# केन्द्रीयसंस्कृतविश्वविद्यालयः , नवदेहली

## एकषष्टितमी अखिभारतीयशास्त्रीयस्पर्धा - २०२३- २४

अयोध्याधाम, उत्तरप्रदेशराज्यम्

(फाल्गुनशुक्लनवमीतः फाल्गुनशुक्लद्वादशीं यावत् )

18/03/2024 - 21/03/2024

## रामान्नास्ति परायणं परतरं रामस्य दासोस्म्यहम् ........

अयोध्यायां केन्द्रीयसंस्कृतविश्वविद्यालयेन (लखनऊ परिसरस्य सहयोगेन) समायोजितायां राष्ट्रस्तरीयप्रतियोगितायां काचन विशिष्टाः घटनाः संवृत्ताः । क्रमशः यथा –



१. श्रीरामजन्मभूमिन्यासस्य महासचिवाः अध्यक्षाः पदाधिकारिणः श्रीरामस्य अर्चकाश्च केन्द्रीयसंस्कृतविश्वविद्यालयस्य विशिष्टेऽस्मिन् कार्यक्रमे साद्यन्तं साहाय्यम् अकुर्वन्। आबहोः कालात् श्रीरामस्य सेवारताः मुख्यार्चकाः सत्येन्द्रदासवर्याः संस्कृतेन एव सभामुखं भाषणम् अकुर्वन्।



२. मणिरामदासछावनी धर्ममण्डपं सत्संगभवनं च पूर्णशः संस्कृतमयम् आसीत्। श्रीरामजन्मभूमिन्यासस्य अध्यक्षाः परमपूज्याः वयोवृद्धाश्च नृत्यगोपालदासस्वामिनः तेषाम् उत्तराधिकारिणः कमलनयनदासवर्याश्च अयोध्यायां संस्कृतमयस्य विशिष्टस्य च कार्यक्रमस्य सफलसमायोजने पूर्णशः सहयोगं प्रायच्छन् ।



३. श्रीरामजन्मभूमिन्यासक्षेत्रस्य महासचिवाः चपंतरायवर्याः उत्तरप्रदेशे आधुनिकयुगे च वेदपाठशालाः गुरुकुलानि च कथं ( सङ्घबलेन) पुनः प्रतिष्ठापितानि इति सम्पूर्तिसत्रे प्रत्यक्षम् उपस्थाय सोदाहरणम् अवदन्। राममन्दिरनिर्माणाभियानस्य शुभारम्भात् प्रतिष्ठापनपर्यन्तं प्रवृत्ताः घटनाः ते साद्यन्तम् अवोचन्। पौषशुक्लद्वादश्याम् अयोध्यायां प्राणप्रतिष्ठापनसन्दर्भे सर्वेषां स्वागतिकाः अपि एते एव आसन्। फाल्गुनशुक्लद्वादश्यां पुनरेकवारं ते सुदीर्घेतिहासं संस्कृतसभामुखं न्यरूपयन्।



४. श्रीरामस्य प्राणप्रतिष्ठापनाचार्याः श्रीविश्वप्रसन्नतीर्थस्वामिनः अखिलभारतीयशास्त्रीयस्पर्धायाः उद्घाटनसन्दर्भे शुभसन्देशं प्रायच्छन्।

दृश्यकणिका



५. इदम्प्रथमतया अयोध्यायाम् आयोजितायां राष्ट्रस्तरीयशास्त्रीयस्पर्धायाम् उपपञ्चशतं प्रतिभाशालिनः स्पर्धालवः द्वात्रिंशत् - संख्याकासु प्रतियोगितासु भागमगृह्णन् । विजयवैजयन्ती कर्णाटकगणेन अर्जिता। 15 स्वर्णपदकानि विजयवैजयन्तीसम्पादनमूलानि अभवन्।







केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
अयोध्याधाम


केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
61तमी अखिलभारतीयशास्त्रीयस्पर्धा
(उत्तरप्रदेशः)


केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
61तमी अखिलभारतीयशास्त्रीयस्पर्धा
2023-24
अयोध्याधाम (उत्तरप्रदेशः)

६. कुलपतीनां विशेषप्रयासैः स्पर्धालवः मार्गदर्शकाः निर्णायकाः कार्यकर्तारः शास्त्रार्थपण्डिताः अभिभावकाः संयोजकाः नानासमितिसदस्याः आयोजकपरिसरीयाश्च श्रीरामस्य भव्यमूर्तेः मन्दिरस्य च दर्शनाय सफलाः अभवन् । उपसहस्रं संस्कृतबन्धुजनानां कृते नवनिर्मितराममूर्तेः विशेषदर्शनव्यवस्था मन्दिरपदाधिकारिभिः कल्पिता आसीत्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य गौरवमनेन अभिवर्धितम् ।




७. अधिकाः स्पर्धाः जानकीघट्टस्थे सार्वभौमसंस्कृतविद्यालयभवने सम्पन्नाः। तन्मध्ये एव लब्धावसराः निर्णायकाः समाहूताः विद्वांसः विदुष्यश्च छात्राणां प्रोत्साहनार्थं वाक्यार्थमकुर्वन्। विदुषीणां वाक्यार्थगोष्ठी विशेषरूपेण अस्मिन् वर्षे स्पर्धाप्रसङ्गे सम्पन्ना।एषः नवाचार एव । इदम्प्रथमतया डा. अर्चना , डा. श्रुतिः, डा. अमृतवर्षिणी इत्येताः महिलाः अयोध्यायां विदुषां समशीर्षिकया वाक्यार्थमकुर्वन्। कुलपतयः अपि सोत्साहेन अत्र उपस्थिताः इत्यपि विशेषः।








८. इदम्प्रथमतया श्रीरामसन्निधौ केन्द्रीयसंस्कृतविश्वविद्यालयस्य परिसरच्छात्रैः अखण्डरामायणपारायणं कृतम्। शृङ्गगिरिपरिसरस्य छात्राः शिक्षकाश्च अयोध्यायां सर्वेषां स्पर्धालूनां आयोजकानां च सहयोगेन अखण्डरामायणपारायणमकुर्वन्। कुलपतिभिः पारायणनिष्ठाः उमामहेश्वरादयः यथोचितं राङ्कवादिभिः सत्कृताः। पारायणोत्तरं रामायणपुस्तकानि स्पर्धायां प्राप्तपुरस्कारेभ्यः उपायनीकृतानि च। एषापि अभूतपूर्वा घटना एव। आहत्य 150 वाल्मीकीयरामायणपुस्तकानि निःशुल्कं वितीर्णानि।




९. इदम्प्रथमतया अयोध्यानगरे बृहत्सङ्ख्याकैः संस्कृतज्ञैः सरयूतटे नगरे च कृतं संस्कृतघोषं दृष्ट्वा नागराः तीर्थयात्रिणश्च आश्चर्यम् आनन्दं चान्वभवन्। किलोमीटर् द्वयं कुलपतयः निदेशकाः च (सर्वैः संस्कृतपरिवारजैः सह ) पद्भ्यां एव यात्रामकुर्वन्।नवेतिहासः एषः। सरयूतटे सम्भूय पूजा दीपाराधनं च सर्वैः विहितम्। स्थानीयाः मार्गस्थाः च संस्कृतशोभायात्रां दर्शं दर्शम् अयोध्यायां इतः पूर्वं एतादृशः कार्यक्रमः नैव सम्पन्नः इति भाषितुम् आरभन्त।

१०. अग्रिमे वर्षे (२०२४-२५) सप्त नगरीषु अन्यतमायां द्विषष्टितमी शास्त्रीयस्पर्धा शास्त्रोत्सवनाम्ना आयोज्यते इति नवघोषणा सूत्रधारोपमैः कुलपतिभिः कृता। तदा चतुस्त्रिंशत्संख्याकाः स्पर्धाः भविष्यन्ति इत्येषापि नवघोषणा एव। रामायणकण्ठपाठः रामायणशलाका च अग्रिमेषु शास्त्रोत्सवेषु नयनातिथी भविष्यतः इत्येषोऽपि अभूतपूर्वः विषयः।

११. केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुख्यालयेन प्रकाश्यमानायाः संस्कृतविमर्शः इत्येतस्याः (UGC CARE Listed) शोधपत्रिकायाः त्रयोविंशः नवोत्कर्षनामकः अङ्कः उद्घाटनकार्यक्रमे लोकार्पितः। ध्वन्यालोकदर्शनम् , हेत्वाभाससामान्यनिरुक्तिप्रकरणम्, रसप्रकर्षः, पाणिनीयधातुवृत्तिकोषः, गीतामृतम् इत्यादीनि विशिष्टानि नवप्रकाशनानि अयोध्यायां विदुषां करकमलाभ्यां प्रसारितानि। आचार्यमदनमोहनपाठकवर्येण सम्पादितस्य जगन्नाथपञ्चाङ्गस्य पञ्चविशतिः वर्षाणि पूर्णानि इत्यतः पञ्चविंशतितमस्य पञ्चाङ्गस्य लोकार्पणं सम्पूर्तिसत्रे कृतम्।




एवं विशिष्टबहुला एकषष्टितमी अखिभारतीयशास्त्रीयस्पर्धा अयोध्यायां सम्पन्ना। अग्रिमवर्षस्य अर्थात् शास्त्रोत्सवस्य स्वरूपमपि सद्यः एव विश्वविद्यालयः प्रकटीकरोतीति शिवम्।



**सहयोगः**

प्रो.सर्वनारायण झा, निदेशकः संयोजकश्च

प्रो.मधुकेश्वरभट्टः, कार्यक्रमनिदेशकः

**लेखः** - डा. गणेशतिम्मणणपण्डितः

उपनिदेशकः (वि.प्र.)

**पुटविन्यासः** – श्रीशसमीरः









**अधिकाधिकचित्राणां सम्प्राप्तिसूत्रम्**

Click Here 1, 2, 3…

**प्रत्यक्षप्रसारावलोकनसूत्रम्**